## ।। अथत्रयोविंशोऽध्याय: ।। chapter - 23

वसिष्ठ उवाच:- ततो गच्छेन्नृपश्रेष्ठ तीर्थं पापहरं परं ।
कश्यपेश्वरनाम्ना वै यत्रा कूपस्य दक्षिणे ।। १

यत्र पूर्वं तपस्तेपे कश्यपो मुनिसत्तम: ।
हिताय सर्वलोकानां महाकारुणिको मुनि: ।। २

कश्यपेश्वरमभ्यर्च्य नमस्कृत्य च कश्यपम्
एकोपवसनान्मर्त्यो राजन् भूयो न जायते ।। ३

मान्धातोवाच :- कथं चकार भगवान् कश्यपस्तप[1] उत्तमम्
प्रत्यक्षोऽभूत्कथं तस्य शंकरो लोकशंकर: ।। ४

वसिष्ठ उवाच :- श्रूयतामभिधास्यामि कथां पापप्रणाशिनीम्
यां श्रुत्वा मानवो लोके सद्य: पापात् प्रमुच्यते ।। ५

आकाशादभवद् ब्रह्मा मरीचिर्ब्रह्मण: सुत:
मरीचे: कश्यपो जात: पुत्रो ब्रह्मविदां वर: ।। ६

-o-

१ बी ई कश्यपस्तथा

आदिष्टः सर्गकर्तृत्वे स पूर्वं पद्मयोनिना ।
प्रजा वत्स त्वया कार्या कल्पस्यादौ चतुर्विधा ॥ ७

इत्थं निशम्य लोकेशात्कश्यपो मुनिसत्तमः ।
सृष्ट्वा चतुर्विधान् लोकान् पिताऽभूज्जगतामसौ ॥ ८

चाक्षुषस्यान्तरे पूर्वं मनोः सर्गे कृतादरः ।
श्रीमालं चोत्रमासाद्य तपश्चक्रे महातपाः ॥ ९

शीर्णपर्णाशिनो भूत्वा दशवर्षाणि पंच च ।
ततो निरशनो राजं[१] स्तस्थौ मीलितलोचनः ॥ १०

श्रीवृक्षबहुले रम्य आश्रमे मुनिपुंगवः ।
आराधयन्महादेवं मुनिवर्चियमोऽभवत् ॥ ११

दक्षिणेनैव पादेन सव्यमाक्रम्य तिष्ठतः ।
गतानि बहुवर्षाणि कश्यपस्य[२] महात्मनः ॥ १२

—०—

१ इं राजन्
(२) काश्यपस्य

तथाऽपि न महेशानस्तस्मै यच्छति वांछितम् ।।
ततोऽति विव्यथे राजन् सर्वमाश्रममण्डलम् ।। १३

काले सर्वाणि शिष्यास्ते स्नात्वा जुहुवति वह्निषु ।
कुर्वन्तो वेदवादांश्च शुश्रूषन्ते मुनीश्वरान्[1] ।। १४

तपस्यतो मुनेस्तस्य स्नानमासीद्घनाम्बुभिः[2] ।
शरीरावरणंचास्य वल्मीकोऽभूत्समंततः ।। १५

कुशैरभ्युन्नते देहः सम्वृतो न च दृश्यते ।।
न श्वासो लक्ष्यते तस्य स्पन्दनं वपुषो न च ।। १६

पश्यन्नपि न चक्षुर्भ्यां वीक्षते मुनिसत्तमः ।।
तदद्भुततमं दृष्ट्वा विषेदुर्ब्रह्मचारिणः ।। १७

नानुस्मरन्ति वेदानां न सिंचन्ति महीरुहान् ।
न कुर्वतेऽग्नि-शुश्रूषां फलान्यश्नन्ति न क्वचित्[3] ।। १८

-०-०-

२ सी बी घननाम्बुभि रित्येव समीचीनः पाठः स्यात्
१ ई मुनीश्वरः
३ ई श्रान्तिन्पुत्रिप ।

श्वापदैरपि भूपाल वनचर्या निराकृता ।
न स्वपन्ति न हृष्यन्ति न खादन्ते तृणान्यपि ।। १९

वाताप्तदलविभ्रंशात् क्रन्दन्त इव पादपा: ।।
आसंस्तत्र तदा ध्यानलीनचेतसि कश्यपे ।। २०

निरुच्छ्वासं निरुत्साहं निरानन्दं निरुद्यमम् ।
अनुल्लासितशाखाग्रमासीदाश्रममण्डलम् ।। २१

अथ वर्षसहस्रान्ते दु:खशोकसमाकुला ।।
बिभ्राणा परमं रूपमाजगाम वसुन्धरा ।। २२

आश्रमे तत्र भूपाल तपोभि: शंकिता पितु: ।
पश्यतां मुनिपुत्राणामिदं वचनमब्रवीत् ।। २३

वसुन्धरोवाच :- क्रियते किमिदं तात सुदु:पारं त्वया तप: ।
येन लोका इमे सर्वे प्राणसंशयमागता: ।। २४

-०-०- १

४ ई सी रुदन्त
श्लोक १९ नास्ति

२ बी ई निराहारं

१ ए नस्वपीन्त

३ ए लीनचेतांसि कश्यपे

नाहं शक्नोमि भवतो भारमुद्धोढुमद्य वै ।
प्रजा त्वत: समुत्पन्ना नाशं मन्ये गमिष्यति ।। २५

त्वं प्रभु: सर्वलोकानां सर्गकर्तृतया विभो ।।
त्वां विना तेन लोकस्य स्थातुं शक्तिर्न विद्यते ।। २६

विमुच्यतामिदं तस्मात्तपो लोकभयावहम् ।।
इत्थं विलप्य बहुधा [१]भूतधात्री नरेश्वर ।। २७

[२]अश्रुण्वति मुनिश्रेष्ठे ययौ खिन्ना यथागतम् ।। २८

अथ तत्रागता राजन्नदिति: खेदसङ्कुला ।
काष्ठीभूतं मुनिं यत्र सेवन्ते मुनिसत्तमा: ।।
व्रतं निरशनं कृत्वा वल्मीकान्तमुपाविशत् ।। २९

एवं वर्षसहस्त्रे द्वे जाते तस्य तपस्विन: ।
विभिद्य सप्तपातालान् पुरस्ताल्लिंगमुत्थितम् ।। ३०

—o—

१ ई भुतमात्रीनरेश्वर:
२ ई अश्रुण्वति

अकस्मादेवजलद: प्रववर्ष जलं बहु ।। ३१
कश्यपस्य मुनीन्द्रस्य प्रभूतजलसेचन: ।।

बल्मीक: शतधा भूतो धौतं च वपुरस्य च ।। ३२

पुरस्तादीक्षते यावदुन्मील्य नयने मुनि: ।
तेजोराशिगतं तावल्लिंगमुत्तममैक्षत ।। ३३

तं दृष्ट्वा विस्मयाविष्टो मुनि: स्तोत्रमिदं जगौ ।। ३४

कश्यपउवाच :- नम: शिवाय शान्ताय शम्भवे प्रभविष्णवे ।।
नमो नेदीयसे तुभ्यं नमस्तेऽस्तु दवीयसे ।। ३५

नमस्ते पंचवक्त्राय पंचभूतात्मने नम: ।
जगदुत्पत्तये मौलौ धृतं चन्द्रकलामृतम् ।। ३६

जगत्संहृतये वह्निस्तथा नेत्रे तृतीयके ।
पालनाय करे दण्डस्तेनासि त्वं त्रयीप्रिय: ।। ३७

--०--

५ ए पंच
६ ए प्रियं:
(ए१) पायोद:
(ए२) विश्नवे
(ए३) दण्डतेनासित्वं
(ए४) त्रयीप्रय:

पृथग्भूताय भूताय शर्वं सर्वात्मने नमः ।।
कामरूपाय कामाय तुभ्यं कामभिदे नमः ।। ३८

वाङ्मयागोचरं यस्य वर्तते परमं महः ।।
भूतानां हृदि सर्वेषां नमस्ते परमात्मने ।। ३९

नमः सर्वरसायाथरसानां पतये नमः ।।
नमो भुवनभावाय जगतामभयाय च ।। ४०

व्यक्ताव्यक्तस्वरूपाय नमस्तुभ्यं स्वयंम्भुवे ।।
कृमिकीटपतंगादि यत्किंचिज्जगतीतले ।
तदेतन्निखिलं नाथ त्वदिच्छापरमाणवः ।। ४१

वृषो हि भगवान् धर्मः कृतस्ते यानमात्मनः ।
इयंदेवी परा शक्तिर्जगमार्जामात्मिका ।। ४२

तवैवात्मोभ्दवा शक्तिर्यया जातं जगत्त्रयम् ।
शतांशेनापि ते शंभोः सदृशो न पुरन्दरः ।।
-o-o-

श्लोक ४१ स्य प्रथम पंक्तिः नास्ति

६ ए पतंग
७ ए शक्तिर्यां न अंग

(ए१) यसि
(ए२) भूवन
(ए३) स्वयंम्भूवे
(ए४) तज्जगत्त्रयम्
(ए५) सदशस्ते पुरंदरः

जगतामीश्वर: कर्ता जगतामीश्वर: पति: ।
जगतामीश्वर: काले संहर्ता नाथ नान्यथा ।। ४४

एतावतैव पर्याप्तं तप: फलमुमापते ।।
यद्दृष्टोऽसि महेशान मया त्वं चर्मचक्षुषा ।। ४५

वसिष्ठ उवाच :- इत्थं स्तुतवतस्तस्य कश्यपस्य महात्मन: ।
मेघध्वनिसमा व्योम्नि वागुवाचाशरीरिणी ।। ४६

वरं वरय भद्रं ते चिरादस्ति यदिप्सितम् ।
तदै दास्याम्यहं ब्रह्मन् तपसा परितोषित: ।। ४७

कश्यप उवाच :- ब्रह्मणा सर्गकर्तृत्वमादिष्टं मम शंकर ।।
स्त्रष्टव्यास्तेन मे लोका भूतेश सचराचरा: ।। ४८

ततोऽहं तोषितान् देवानात्मन: पुत्रतां गतान् ।
वाञ्छामि भक्तो दत्तान् शम्भो वैवस्वतान्तरे ।। ४९

देवदेव उवाच :- तव पुत्रा भविष्यन्ति तोषिता वै प्रजापते ।।
इहैव श्रीप्रिये तीर्थे श्रीमाले मुनिसत्तम ।। ५०

तपस्तप्त्वा व्रजिष्यन्ति देवलोकाय कश्यप ।।
पुनर्ब्रूहि वरं ब्रह्मन् देवानामपि दुर्लभम् ।। ५१
वरेणैकेननानृण्यं तपसस्ते भवेन्मयि ।। ५२

कश्यप उवाच :- आश्रमेऽत्र त्वया देव वस्तव्यं शाश्वती: समा: ।
प्रीत्या मम मनुष्याणां पापान्यपहरन् हर ।। ५३

-०-०-

२ सी इप्सितम्

१ ए यद्

देवदेव उवाच :- इह वत्स्यामि सततं तव प्रीत्या वराश्रमे ।[1] [2]
स्तुतो दास्यामि भक्तेभ्य: सर्वान् कामान् यथेप्सितान् ।। ५४

कश्यपस्य तपोत्युग्रं कुर्वतो लिंगमुत्थितम् ।।
कश्यपेश्वरनाम्ना वै तत: ख्यातिं गमिष्यति ।। ५५

येऽत्र स्नानं करिष्यन्ति मनुजा भक्तिभाविता: ।।
ते यास्यन्ति परं स्थानं देवानामपि दुर्लभम् ।। ५६

प्रीतये तव येचात्र नरा दास्यन्ति वाससी ।
तेषां तुष्टी: प्रदास्यन्ति पितर: प्रियमुत्तमाम् ।। ५७

पितृपक्षे च पंचम्यां योऽत्र स्नानं करिष्यति ।।
यास्यन्ति पितरस्तुष्टास्तस्य ब्रह्मसलोकताम् ।। ५८

वसिष्ठ उवाच- इत्युक्त्वा भारती दिव्या विरराम नरेश्वर ।।
कश्यपोऽपि मुदा युक्तस्तस्थौ तत्र वराश्रमे ।। ५९

-o-

१ बी कामानभीप्सितान्
(ए२) यथोप्सितान्

इति पूर्वं महीपाल तपोऽतप्यत कश्यपः
श्रीमाले यस्य नाम्नाऽस्ति विख्यातः कश्यपेश्वरः ।। ६०

अद्यापि तत्र राजेन्द्र भिक्षुवेषेण कश्यपः ।
श्रीमाले विचरत्येको[1] द्विजगेहेषु सर्वसु ।। ६१

अजानन्नपि यस्तस्मै ग्रासमात्रं प्रयच्छति ।
बहूनि धनधान्यानि गृहे तस्य भवन्ति[2] वै ।। ६२

कश्यपेश्वर माहात्म्यमिदं यः शृणुयान्नरः ।
सप्तरात्रकृतं पापं तस्य नाशमुपैति हि ।। ६३

-०-

श्री स्कंदपुराणे एकाशीति साहस्त्र्या संहितायां
ब्राह्म्य विभागे तृतीय परिच्छेदे श्रीमालमाहात्म्ये कश्यपेश्वर —
माहात्म्यं नाम त्रयोविंशोऽध्यायः ।। २३ ।।

१ ई विवरत्ये
२ ए भवन्तिव